# जानकीहरणे कालिदासस्य काव्यभावना

**डॉ. प्रीतम-मण्डलः,**
सहायकाध्यापकः, पोलवा-महाविद्यालयः, पोलवा, हुगली

**सारः-** नवनवोन्मेषशालिणीं प्रतिभामुपजीव्य कवयो यद्यपि नवनवकाव्यानि विरचयन्ति तथापि तेषां रचनासु किमपि सादृश्यं समापतति। वस्तुतः कवयः प्रायशः पूर्ववर्तिकविरचनाप्रभावेन प्रभावान्विताः भवन्ति। भाषाभावच्छन्दोऽलंकारशैलीप्रभृतिषु कवीनां स्वकीया चिन्ताधारा यद्यपि तिष्ठति तथापि सम्यक् निरीक्षणेन अवगम्यते यत् यस्य कस्यचित् रचनाक्षेत्रेऽन्येषां पूर्वाचार्याणां प्रभावः क्वचित् क्वचित् परिलक्ष्यते। एवं कुमारदासस्योपरि पूर्ववर्तिकालिदासस्य प्रभावः दृश्यते। अधुनात्र कुमारदासस्य जानकीहरणमहाकाव्ये प्रतिफलिताः कालिदासस्य प्रभावाः समासेन उपस्थाप्यन्ते।

**कुञ्चिकाशब्दाः-** कुमारदासः, जानकीहरणम्, कालिदासः, रघुवंशम्, कुमारसम्भवम्, मेघदूतम्, अभिज्ञानशकुन्तलम्, प्रभावाः, सादृश्यानि

**मूलम्-** कालिदासोत्तरकालिकेषु महाकाव्यरचयितृषु कुमारदासोऽन्यतमः। कविनानेन विंशतिसर्गेषु विभक्तं जानकीहरणम् इति महाकाव्यं व्यरचि। आदिकविवाल्मीकिविरचितं श्रीमद्रामायणमेव काव्यस्यास्य उपजीव्यत्वेन स्वीकृयते। अपि च कविरयं महाकविकालिदासं सर्वथा अनुचकार स्वकाव्यनिर्माणावसरे। यद्यपि रघुवंशम्, कुमारसम्भवम्, मेघदूतम्, अभिज्ञानशकुन्तलम् इति ग्रन्थचतुष्टयस्य प्रभावःकुमारदासस्य जानकीहरणे दृश्यते तथापि रघुवंशम् इति महाकाव्यस्य प्रभावः जानकीहरणे सर्वाधिकः प्राप्तरूपः परिलक्ष्यते। अतः उभयोरेव कविवरयोः कालिदासकुमारदासयोः रचनासु आख्यानगतं भावगतं श्लोकगतं कल्पनागतं वा सादृश्यं परिप्राप्यते। अधुनात्र तयोः कविकर्मसु प्राप्यमाणानां सादृश्यानां सामासिकं चित्रमेकं चित्रयितुं यत्यते।

अयोध्यायाः ततश्च महाराजस्य दशरथस्य दिग्विजयस्य वर्णनेन जानकीहरणमहाकाव्यं प्रारभते। रघुवंशमहाकाव्ये षोडशसर्गे अयोध्यालक्ष्म्याः आक्षेपमाध्यमेन अयोध्यायाः प्रासादः,

राजपथः, दीर्घिका, उद्यानमित्यादयः विषयाः प्रकारान्तरेण वर्णिताः।[1] रघुवंशस्य अयोध्यावर्णनेन सह जानकीहरणस्य अयोध्यावर्णनम् अंशतः समतामेति।

दिङ्मात्रमुदाहरणं यथा-

'निशासु भास्वत्कलनुपूराणां यः सञ्चरोऽभूदभिसारिकाणाम्।

नदन्मुखोल्काविचितामिषाभिः स वाह्यते राजपथः शिवाभिः।।'[2]

इति रघुवंशान्तर्गतश्लोके सुसमृद्धायाम् अयोध्यायाम् अभिसारिकाणामवस्था कथिता। जानकीहरणेऽपि तासामवस्थां वर्णयता कविना निगदितम्-

'कृत्वापि सर्वस्य मुदं समृद्ध्या हर्षाय नाभूदभिसारिकाणाम्।
निशासु या काञ्चनतोरणस्थरत्नांशुभिर्भिन्नतमिस्त्रराशिः।।'[3] इति।

अपि च मेघदूते अलकावर्णनस्य प्रतिबिम्बनं जानकीहरणस्य अयोध्यानगरीवर्णनायां विलोक्यते। तद्यथा-

'अन्तस्तोयं मणिमयभुवस्तुङ्गमभ्रंलिहाग्राः।
प्रासादास्त्वां तुलयितुमलं यत्र तैस्तैर्विशेषैः।।'[4]

इत्यस्मिन् श्लोकार्धे आकांशस्पर्शिनां प्रासादानाम् उल्लेखः कालिदासेन विहितः। कुमारदासेनापि अयोध्यावर्णनकाले तादृशप्रासादं वर्णयता उक्तम्-

'चीनांशुकैरभ्रलिहामुदग्रशृङ्गाग्रभागोपहितैर्गृहाणाम्।'[5] इति।

रघुवंशे दशरथस्य दिग्विजयः[6] पञ्चभिः श्लोकैः संक्षेपेण वर्णितः। जानकीहरणे विषयेऽस्मन् विस्तृतं वर्णनं विहितम्।[7] दिग्विजयवर्णनविषये दशरथमपेक्षया रघोः दिग्विजयवर्णनेन[8] कुमारदासः प्रभावित आसीत्। तद्यथा-

पृथिवीं जिगीषोः रघोः आदौ पूर्वदिशं प्रति गमनम्[9], पूर्वसागरं प्रति सैन्यानां सरणम्[10], यवनस्योल्लेखः[11] चेत्यादिविषयाः जानकीहरणेऽपि दशरथस्य दिग्विजयकाले[12] प्रसङ्गतः उल्लिखिताः।

रघुवंशे जानकीहरणे च दशरथस्य मृगयायाः वर्णनं विस्तृतेन विहितम्।[13] उभयत्र वर्णना प्रायेण तुल्यरूपता प्राप्ता। तद्यथा-

'लक्ष्मीकृतस्य हरिणस्य हरिप्रभावः प्रेक्ष्य स्थितां सहचरीं व्यवधाय देहम्।

आकर्णकृष्टमपि कामितया स धन्वी वाणं कृपामृदुमनाः प्रतिसंजहार।।'[14]

इत्यस्मिन् रघुवंशान्तर्गतश्लोके हरिणयुगलं निरीक्ष्य करुणार्द्रचित्तः दशरथः मृगप्रहारकार्यात् आत्मनः अभिलाषं दुरीचकार। इयञ्च कालिदासवर्णना अनुरूपयैव रीत्या वाणीरूपमासादिता जानकीहरणे। तथा चोक्तं कुमारदासेन-

'अन्योन्यवक्त्रार्पितपल्लवाग्रग्रासं नृवीरस्य कुरङ्गयुग्मम्।
प्रियानुनीतौ भृशमिष्टचाटुचेष्टस्य घाताभिरतिं निरासे।।'[15] इति।

रघुवंशे दशमसर्गे रावणोत्पीडनात् मुक्तिलाभाय देवतानां विष्णुं प्रति गमनम्, विष्णोः वर्णम्, देवानां विष्णुस्तुतिश्चेत्यादयः वर्णिताः।[16] कुमारसम्भवे द्वितीयसर्गे तारकासुरस्य अत्याचारेण क्लिष्टानां देवानां ब्रह्मणः सविधे गमनादिवृत्तान्तः वर्णितः।[17] उक्तमहाकाव्यद्वये उल्लिखितस्य वर्णनस्य प्रतिबिम्बनमालोक्यते जानकीहरणे द्वितीयसर्गे।[18] तद्यथा कुमारसम्भवे द्वितीयसर्गे दृश्यते यत् पुरतः इन्द्रदेवं स्थापयित्वा देवाः ब्रह्मणः सविधे जग्मुः। तथोक्तं कालिदासेन-

'तस्मिन्विप्रकृताः काले तारकेण दिवौकसः।
तुरासाहं पुरोधाय धाम स्वायंभुवं ययुः।।'[19] इति।

रघुवंशेऽपि कथितम्-

'तस्मिन्नवसरे देवाः पौलस्त्योपप्लुता हरिम्।
अभिजग्मुर्निदाघार्ताश्छायावृक्षमिवाध्वगाः।।'[20] इति।

जानकीहरणेऽपि विष्णुं निकषा देवतानां गमनकाले समैव वर्णिना समुपलभ्यते-

'रावणेन रणे भग्ना देवा दावाग्नितेजसा।
द्रष्टुं जगत्पतिं जग्मुः पुरस्कृतपुरन्दराः।।'[21] इति

रघुवंशे प्रथमसर्गे वशिष्ठमुनेः तपोवनस्य संक्षिप्तवर्णनायां[22] मुनिकन्याभिः वृक्षादीनां परिपालनम्[23], ऋषिपत्नीमृगयोः सस्नेहसम्पर्कः[24], यज्ञोत्थितधूमैः आश्रमस्य पवित्रतासम्पादनम्[25] इत्यादयः विषयाः यथा परिदृश्यन्ते तथैव जानकीहरणे पञ्चमसर्गे विश्वामित्रस्य तपोवनवर्णनायां[26] कालिदासस्य तपोवनवर्णनस्य प्रतिबिम्बनमालोक्यते।

अभिज्ञानशकुन्तलमिति नाटकस्य चतुर्थेऽङ्के शकुन्तलायाः पतिगृहगमनकालीनं यद्वर्णनं समाचरितं प्रायेण तदनुरूपमालेख्यं चित्रितमालोक्यते जानकीहरणस्य नवमसर्गे सीतायाः

पतिगृहगमनकाले।[27] तद्यथा- शकुन्तलायाः पतिगृहयात्रासमये तस्यै महर्षिकाश्यपेन सुगृहिनी-कर्तव्योपदेशः प्रदत्तः। तथाहि कालिदासेन भणितम्-

'शुश्रुषस्व गुरुन् कुरु प्रियसखीवृत्तिं सपत्नीजने
भर्तुविप्रकृतापि रोषणतया मास्म प्रतीपं गमः।

भूयिष्टं भव दक्षिणा परिजने भाग्येष्वनुत्सेकिनी
यान्त्येवं गृहिणीपदं युवतयो वामाः कुलस्याधयः।।'[28] इति।

अस्यानुरूपो भावो यथा जानकीहरणे-

'गतापि भर्त्रे परिकोपमायतं गिरः कृथा मा परुषार्थदीपनीः।
कुलस्त्रियो भर्तृजनस्य भर्त्सने परं हि मौनं प्रवदन्ति साधनम्।।'[29] इति।

अपि च अभिज्ञानशकुन्तले पालितकन्यायाः शकुन्तलायाः पतिगृहगमनावसरे विरहविध्वस्तचेतसः पितुः कन्वस्य करुणावस्थां वर्णयता कालिदासेन निगदितम्-

'यास्यत्यद्य शकुन्तलेति हृदयं संस्पृष्टमुत्कण्ठया
कण्ठः स्तम्भितवाष्पवृत्तिकलुषश्चिन्ताजडं दर्शनम्।

वैक्लव्यं मम तावदीदृशमहो स्नेहादरण्योकसः
पीड्यन्ते गृहिणः कथं नु तनयाविश्लेषदुखैर्नवैः।।'[30] इति।

जानकीहरणेऽपि भावोऽयं प्राप्तरूपः परिदृश्यते। तथा चोच्यते कुमारदासेन-

'अयं त्वदेकप्रवणो मनोरथो वृथाऽद्य दैवादपि नाम नो भवेत्।
इति प्रवक्तुर्जरतो निरासिरे निगृह्य कण्टं वचनापि मन्युना।।'[31] इति।

रघुवंशमहाकाव्ये[32] नगरं प्रविशतोः अजेन्दुमत्योः कुमारसम्भवे[33] च परिहितपरिणयवेशस्य महेश्वरस्य दर्शनव्यापारे नारीणां यथैत्सुक्यादिरेकस्तथैव रामचन्द्रदर्शनविधावपि अयोध्या-पुरङ्गनानां व्यग्रता नो नयनपथमेति।[34] तादृशमौत्सुक्यं प्रकाशयता कालिदासेन रघुवंशे एकस्मिन् श्लोके निगदितम्-

'ततस्तदालोकनतत्पराणां सौधेषु चामीकरजालवत्सु।
बभूवुरित्यं पुरसुन्दरीणां त्यक्तान्यकार्याणि विचेष्ठितानि।।'[35] इति।

कुमारसम्भवेऽपि कालिदासेनोच्यते-

'तस्मिन् मुहूर्ते पुरसुन्दरीणामीशानसन्दर्शनलालसानाम्।
प्रासादमालासु बभूवुरित्थं त्यक्तान्यकार्याणि विचेष्टितानि।।'[36] इति।

उल्लिखितकालिदासवर्णना अनुरूपयैव रीत्या वाणीरूपमासादिता जानकीहरणे। तथा चोक्तं कुमारदासेन-

'गुरूनपृष्टैव कुमारमीक्षितुं जवेन वातायनमीयुरङ्गनाः।
न ता न सत्यो न च मुदवृत्तयस्तथाहि वंशस्य रघोर्विनीतता।।'[37] इति।

जानकीहरणस्य अष्टमसर्गे वर्णितं रामसीतयोः सम्भोगचित्रं[38] कुमारसम्भवस्य अष्टमसर्गवर्णितेन हरपार्वत्याः सम्भोगचित्रेण[39] सह सादृश्यावहम्। अपि च जानकीहरणे मन्दोदरयाः विलापवर्णनायां[40] कुमारसम्भववर्णितस्य रतिविलापस्य[41] प्रभावो बाहुल्येनालोक्यते।

अधुना कालिदासकुमारदासयोः काव्येषु समुपलभ्यमानानां भावगतसादृश्यानां कल्पनासाम्यानां शैलीगतसादृश्यानाञ्च कतिचिदत्र समुल्लिख्यन्ते-

| **कालिदासः** | **कुमारदासः** |
|---|---|
| 1. 'अतः सोऽभ्यन्तरान् नित्यान् षट् पूर्वमजयद्रिपुन्'[42] | 1. 'स षड्द्विषः पुर्वमसौ विजिग्ये'[43] |
| 2. 'आपीनभारोद्वहनप्रयत्वात्'[44] | 2. 'स्तनद्वयस्योद्वहनश्रमेण'[45] |
| 3. 'भित्वा निराक्रामदरालकेश्याः'[46] | 3. 'अरालकेश्या अलके विधात्रा'[47] |
| 4. 'शापोऽण्यदृष्टतनयाननपद्मशोभे'[48] | 4. 'अदृष्टपुत्राननवन्ध्यादृष्टिः'[49] |
| 5. 'ततो मृगेन्द्रस्य मृगेन्द्रगामी'[50] | 5. 'मृगेन्द्रगामी मृगयां जगाम'[51] |
| 6. 'पुत्रीकृतोऽसौ वृषभध्वजेन'[52] | 6. 'पुत्रीकृतानी श्वरया शिशुत्वे'[53] |
| 7. 'अभिज्यधन्व विचचार दावम्'[54] | 7. 'अधिज्यधन्वा धनदप्रभावः'[55] |
| 8. 'वन्यस्य नेत्रविवरे महिषस्य मुक्तः'[56] | 8. 'मध्येललाटं महिषस्य मुक्तः'[57] |
| 9. 'अथ प्रजानामधिपः प्रभाते'[58] | 9. 'प्रभुः प्रजानामथ स प्रभाते'[59] |
| 10. 'वधाय वध्यस्य शरं शरण्यः'[60] | 10. 'शरं शरण्येऽपि मुमोच बाले'[61] |
| 11. 'तत्र स द्विरदवृंहितशङ्की'[62] | 11. 'श्रुत्वा रवं वृंहितनादशङ्की'[63] |
| 12. 'लज्जा तिरश्चां यदि चेतसि स्या-<br>दसंशयं पर्वतराजतुल्याः।<br>तं केशपाशं प्रसमीक्ष्य कुर्यु-<br>र्बालाप्रियत्वं शिथिलं चमर्यः।।'[64] | 12. 'तत् केशपाशावजितात्मबर्ह-<br>भारस्य वासः शिखिनो वनेषु।<br>चक्रे जनस्य स्पृशतीति शङ्कां<br>चेतस्तिरश्चामपि जातु लज्जाम्।।'[65] |
| 13. 'भोगिभोगासनासीनम्'[66] | 13. 'भोगिभोगासनक्षोभः'[67] |
| 14. 'श्रियः पद्मनिषण्यायाः क्षौमान्तरितमेखले।<br>अङ्के निक्षिप्तचरणमास्तीर्णकरपल्लवे।'[68] | 14. 'स्वमुखे सञ्चरदृष्टेरङ्कविन्यस्तपार्ष्णिना।<br>स्पृशन्तं पादपद्मेन पद्माया नाभिमण्डले।।'[69] |

15. 'यात्येकतोऽस्तशिखरं पतिरोषधीनाम्
आविष्कृतोऽरुणपुरः सर एकतोऽर्कः।
तेजोद्वयस्य युगपद्व्यसोदयाभ्यं
लोको नियम्यत इवैष दशान्तरेषु।।'[70]

16. 'सुगन्धिनिश्वासविवृद्धतृषाम्'[72]

17. 'सृजती वाष्पमिवाञ्जनविलम्'[74]

18. 'अकालसन्ध्यामिव धातुमन्ताम्'[76]

19. 'नृत्यत् कबन्धं समरे ददर्श'[78]

20. 'प्रजानामेव भूत्यर्थं स ताभ्यो वलिमग्रहीत्।
सहस्रगुणमुत्स्रष्टुमादत्ते हि रसं रविः।।'[80]

21. 'स्वरेण तस्याममृतस्रुतेव
प्रजल्पितायामभिजातवालि।
अप्यन्यपुष्टा प्रतिकुलशब्दा
श्रोतुर्वितन्त्रीरिव ताड्यमाना।।'[82]

22. 'ज्ञातमन्मथरसाः शनैः शनैः'[84]

23. 'शिक्षितं युवतिनैपुणं तया'[86]

24. 'पृथिवीं शासतस्तस्य पाकशासनतेजसः।
किञ्चिदूनमनूनर्द्धेः शरदामयूतं ययौ।।'[88]

25. 'पलितच्छद्मना जरा'[90]

26. 'प्रतिवध्नाति हि श्रेयः पुज्यपुजाव्यतिक्रमः'[92]

27. 'एवं वादिनि देवर्षो पार्श्वे पितुरधोमुखी'[94]

28. 'प्रणिपातप्रतीकारः
संरम्भो हि महात्मनाम्'[96]

15. 'नूनं पती स्थावरजङ्गमानां
पर्यायविश्रासपरार्थतन्त्रौ।
एकत्र मज्जत्यधिवारि सिन्धो-
रन्यो जहौ तत्कमलाकराम्भः।।'[71]

16. 'सुगन्धिनिश्वासगुणावकृष्टम्'[73]

17. 'स्थूलानिवोढाञ्जनवाष्पबिन्दुन्'[75]

18. 'सन्ध्यामकालघटितां गगने विनेतुः'[77]

19. 'समरपटहकोषे तत्र नृत्तं कवन्धैः'[79]

20. 'आदाय करमादयेभ्यः कीकटेष्वपि वर्षसि।
प्रपीय वाहि सिन्युभ्यः स्थलेष्विव घनाधनः।।'[81]

21. 'तन्व्या मनोज्ञस्वरनैपुणेन
विनिर्जितो रोषविलोहिताक्षः
प्रसक्तचिन्ताऽऽहितमन्यपुष्टः
शोकेन कार्ष्ण्यं वहतीति मन्ये।।'[83]

22. 'ज्ञानमन्मथरसा मदातुरे'[85]

23. 'शिक्षितुं युवतिकृत्यनैपुण्यम्'[87]

24. 'ततो नयेन नयतो राज्यं राजीनचक्षुषः।
तस्य शक्रसमानस्य समानामयुतं ययौ।।'[89]

25. 'पलितच्छद्मना दोषा'[91]

26. 'दुषयिष्यति पुज्येषु पुजावैमुख्यमायतिम्।'[93]

27. 'इत्थं वादिनि राजेन्द्र रामो मौनमधिश्रितः'[95]

28. 'जनस्य चेतो दधतः समुन्नतं रूषः।
प्रणिपातविधिः प्रतिक्रिया।।'[97]

सर्वान्तिमे समीक्षाया अस्याः फलरूपेण अस्माकं मनसि एतदापतितं यत् जानकीहरणमहाकाव्यस्य प्रकल्पने कालिदासप्रमुखानां पूर्ववर्तिकवीनां प्रभावविशेषो यद्यपि परिलक्ष्यते तथापि तेषां सर्वेषां प्रभावमात्मसात् कृत्वालोकसामान्यप्रतिभाप्रभया विराजमानेन महाकविना कुमारदासेनाभिनवतया काव्यमिदं विरचितम्।

**सन्दर्भाः**

---

[1] जानकीहरणम्, १६/१-२१
[2] रघुवंशम्,१६/१२
[3] जानकीहरणम्, १/३
[4] मेघदूतम्, उत्तरमेघः, १
[5] जानकीहरणम्, १/४
[6] रघुवंशम्,९/९-१३
[7] जानकीहरणम्, १/१६-२५
[8] रघुवंशम्,४/२८-८५
[9] तत्रैव, ४/२८
[10] तत्रैव, ४/३२
[11] तत्रैव, ४/६१
[12] जानकीहरणम्, १/१६,१७, १९
[13] रघुवंशम्,९/४८-७३
जानकीहरणम्, १/४५-७४
[14] रघुवंशम्,९/५७
[15] जानकीहरणम्, १/५७
[16] रघुवंशम्,१०/५-४९
[17] कुमारसम्भवम्, २/१
[18] जानकीहरणम्, २/१-७९
[19] कुमारसम्भवम्., २/१
[20] रघुवंशम्,१०/५
[21] जानकीहरणम्, २/१
[22] रघुवंशम्,१/४९-५३
[23] तत्रैव, १/५१
[24] तत्रैव, १/५०
[25] तत्रैव, १/५३
[26] जानकीहरणम्, ५/१-२४,५/१,५/६,५/५
[27] तत्रैव, ९/२-११
[28] अभिज्ञानशकुन्तलम्, ४/१८
[29] जानकीहरणम्, ९/६
[30] अभिज्ञानशकुन्तलम्, ४/६
[31] जानकीहरणम्, ९/९
[32] रघुवंशम्,७/५-१२
[33] कुमारसम्भवम्, ७/५६-६१
[34] जानकीहरणम्, ९/५२-६२
[35] रघुवंशम्,७/५
[36] कुमारसम्भवम्, ७/५६
[37] जानकीहरणम्, 9/52९/५२

[38] तत्रैव, 8/1-54८/१-५४
[39] कुमारसम्भवम्, ०८/१-२७
[40] जानकीहरणम्, १९/३२-५१
[41] कुमारसम्भवम्, ४/२-३८
[42] रघुवंशम्,१७/४५
[43] जानकीहरणम्, १/१४
[44] रघुवंशम्, २/१८
[45] जानकीहरणम्, १/३२
[46] रघुवंशम्, ६/८१
[47] जानकीहरणम्, १/३३
[48] रघुवंशम्, ९/८०
[49] जानकीहरणम्, १/४४
[50] रघुवंशम्,२/३०
[51] जानकीहरणम्, १/४६
[52] रघुवंशम्,२/३६
[53] जानकीहरणम्, १/४७
[54] रघुवंशम्,२/८
[55] जानकीहरणम्, १/५२
[56] रघुवंशम्,९/६१
[57] जानकीहरणम्, १/५९
[58] रघुवंशम्,२/१
[59] जानकीहरणम्, १/७०
[60] रघुवंशम्,२/३०
[61] जानकीहरणम्, १/७४
[62] रघुवंशम्,९/७३
[63] जानकीहरणम्, १/७४
[64] कुमारसम्भवम्, १/४८
[65] जानकीहरणम्, १/४१
[66] रघुवंशम्,१०/७
[67] जानकीहरणम्, २/५
[68] रघुवंशम्,१०/८
[69] जानकीहरणम्, २/७
[70] अभिज्ञानशकुन्तलम्,४/२
[71] जानकीहरणम्, ३/५९
[72] कुमारसम्भवम्, ३/५६
[73] जानकीहरणम्, ३/४५
[74] रघुवंशम्,८/३५
[75] जानकीहरणम्, ३/५८
[76] कुमारसम्भवम्, १/४
[77] जानकीहरणम्, ५/५८

[78] रघुवंशम्,७/५१
[79] जानकीहरणम्, ५/५६
[80] रघुवंशम्,१/१८
[81] जानकीहरणम्, ६/३८
[82] कुमारसम्भवम्, १/४५
[83] जानकीहरणम्, ७/१७
[84] कुमारसम्भवम्, ८/१३
[85] जानकीहरणम्, ८/२६
[86] कुमारसम्भवम्, ८/१७
[87] जानकीहरणम्, ८/२९
[88] रघुवंशम्,१०/१
[89] जानकीहरणम्, १०/१
[90] रघुवंशम्,१२/२
[91] जानकीहरणम्, १०/३
[92] रघुवंशम्,१/७९
[93] जानकीहरणम्, १०/६५
[94] कुमारसम्भवम्, ६/८४
[95] जानकीहरणम्, १०/४२
[96] रघुवंशम्, ४/६४
[97] जानकीहरणम्, ९२/५२

## अनुशीलितग्रन्थसूची


**संस्कृतभाषानिबद्धाः ग्रन्थाः**

- कुमारदासः, जानकीहरणम्, सम्पा. जि.कृष्णप्रसादः, बेङ्गलुरुः विद्याधीशस्नातकोत्तरसंस्कृतशोधकेन्द्रम्, २०१५.
- दाहालः, आचार्यः लोकमणिः, संस्कृतसाहित्येतिहासः, वाराणसी: चौषम्बा कृष्णदास अकादेमी, २०११ (चतुर्थसंस्करणम्).
- वन्द्योपाध्यायः, धीरेन्द्रनाथः, संस्कृतवाङ्मयस्य इतिहासः, कलिकाताः संस्कृत-पुस्तक-भाण्डारः, २०१४ (प्रथमसंस्करणम्).
- वाल्मीकिः, रामायणम्, सम्पा. वासुदेवलक्षणशास्त्रीपणशीकरः, मुम्बईः पाण्डुरङ्ग जावजी, १९३० (चतुर्थसंस्करणम्).

**हिन्दीभाषानिबद्धाः ग्रन्थाः**

- उपाध्याय, आचार्य बलदेव, संस्कृत साहितय का इतिहास, वाराणसी: शारदा निकेतन, २००१.
- कालिदास, रघुवंशम्, सम्पा. कृष्णमणि त्रिपाठी, वाराणसी: चौखम्बा सुरभारती प्रकाशन, २०१४ (प्रथमसंस्करणम्).
- कुमारदास, जानकीहरणम्, सम्पा. श्रीकृष्णदास, इलाहवादः मित्र प्रकाशन प्राइवेट लिमिटेड, १९६६ (प्रथम संस्करण).

**बङ्गभाषानिबद्धाः ग्रन्थाः**

- कालिदास, अभिज्ञानशकुन्तलम्, सम्पा. श्रीसत्यनारायण चक्रवर्ती, कलकाताः संस्कृत पुस्तक भाण्डार, २००८ (षष्ठ संस्करण, चतुर्थ मुद्रण).

- वन्द्योपाध्याय, धीरेन्द्रनाथ, संस्कृत साहित्येर इतिहास, कलकाता: पश्चिमवङ्ग राज्य पुस्तक पर्षत्, २००९ (द्वितीय संस्करण, तृतीय मुद्रण).

**आङ्गलभाषानिबद्धाः ग्रन्थाः**

- Kalidas.2005. *Raghuvamsa* (*The Raghuvamsa of Kalidas.* Ed. Kasinath Pandurang Parab.New Delhi: Cosmo Publications. (1st Edition).
- Krishnamachariar, M. 1989. *History of Classical Sanskrit Literature.* Delhi:Motilal Banrsidass. (Reprint of 3rd Edition, 1974).
- Keith, A. Berriedale.2010. *A History of Sanskrit Literature.* Delhi:Motilal Banarsidass Publishers Pvt. Ltd. (Reprint of 1st Edition, 1993).
- Kumardass.1977. *Janakiharana (Janakiharanam of Kumardasa).* Ed. Dr. V. Raghavan. Delhi: Motilal BanarasiDass. (1st Edition).
- Kumardass.1907. *Janakiharana.* Ed. Gopal Raghunath Nandarikar. Bombay:Luzac and Co. (1st Edition).
- Kumardass.1908. *Janakiharana (The Janakiharana of Kumardasa).* Ed. Shastree Narayan Vasudeva Nigudkar. Bombay: The Oriental Publishing Co. (1st Edition).